**तौलिन्** पु० तुलैव तौलं तत् विद्यतेऽस्य इनि । तुलाराशौ "तौलिनि चित्रान्त्यार्द्धं स्वातिः पादत्रयं विशाखायाः" वृ०सं०१०२अ०। अस्य क्लीवत्वमपि "शक्रे तौलि हुताशनेऽलिधनुषी याम्ये मृगो नैरृते" ज्यो०राशिलग्ननिर्णयः ।

**तौल्य** त्रि० तुलया परिच्छिन्नम् ष्यञ् । तुलया परिच्छिन्ने त्रिका० । तुल्यमेव स्वार्थेऽण् । २तुल्ये न० ।

**तौल्वलि** पु०तुल्वलस्यापत्यम् इञ् । तुल्वलर्षेरपत्ये "सर्वेभ्य एव निष्पृणीयादिति तौल्वलिः क्रियागुणत्वात्" आश्व० श्रौ० २।६।१७ "अभक्षणमितरेषां तौल्वलिः कृतार्थत्वात्" ५।६।२४ । ततः इञन्तत्वात् यूनि फक् तौल्वल्यादित्वात् युवप्रत्ययस्य न लुक् । तौल्वलायन—यूनि तदपत्ये ।

**तौल्वल्यादि** पु० "न तौल्वलिभ्यः" पा० सूत्रोक्ते युवप्रत्ययस्य लुकि पर्य्युदस्ते शब्दगणे स च गणः पा०ग०सू० उक्तो यथा

"तौल्वलि, धारणि. पारणि. रावणि, दैलीपि, दैवति, वार्कलि, नैवकि, दैवमति, दैवयज्ञि, चाफट्टकि, वैल्वकि, वैङ्कि, आनुराहति, पौष्करसादि, आनुरोहति, आनुति, प्रादोहनि, नैमिश्रि, प्राड़ाहति, वान्धकि, वैशीति, आसिनासि, आहिंसि, आसुरि, नैमिषि, आसिबन्धकि, पौष्करेणुपालि, वैकर्णि, वैरकि, वैहति ।

**तौवरक** त्रि० तुवर्य्या इदम् अण् स्वार्थे क । तुवरीसम्बन्धिनि १स्नेहादौ "स्नुते भल्लातकस्नेहात् स्नेहात्तौवरकात्तथा" सुश्रुतः । स्वार्थे अण् । ततः स्वार्थे क । २तुवरके । "आयुष्करं तौवरकं कषायं कटुपाकिकम् । उष्णं कृमिज्वरानाहमेहावर्त्तविनाशनम्" सुश्रुतः ।

**तौविलिका** स्त्री ओषधिभेदे । तौविलिके ! ऽवेलयावायमैलव ऐलयीत्" अथ० ६।१६।२ ।

**तौषायण** त्रि० तुषस्यादूरदेशादि पक्षा० चतुरर्थ्यां फक् । तुषस्यादूरदेशादौ ।

**तौषार** त्रि० तुषारस्येदमण् । तुषारसम्बन्धिनि जले राजनि० "तत्रान्तरिक्षं धारं कारं तौषारं हैममिति" आन्तरिक्षजलविभागे सुश्रुतः । भावप्र० तल्लक्षणादि उक्तं यथा "अपि नद्याः समुद्रान्ते वह्निरापस्य तद्भवाः । धूमावयवनिर्मुक्तास्तौषाराख्यास्तु ताः स्मृताः । अपथ्याः प्राणिनां प्रायो भूरुहाणान्तु ता हिताः । तुषाराम्बु हिमं रूक्षं स्याद्वातलमपित्तलम् । कफोरुस्तम्भकण्ठाग्निमेदोगण्डादिरोगनुत्" । नदीमारभ्य समुद्रपर्य्यन्तं वह्निरास्ते तद्भवा वह्निभवाः धूमावयवनिर्मुक्ताः धूमांशरहिता आपः तौषाराख्या इत्यर्थः ।

**त्मन्** पु० आत्मन्+आलोपः । आत्मनि "त्मनमूर्जं न विश्वध क्षरध्यै" ऋ० १।६३।८ । त्मनमात्मानम् । "आङोऽन्यत्रापि छन्दसि दृश्यते" पा० इत्यात्मन आकारलोपः संज्ञापूर्वकस्य विधेरनित्यत्वादुपधादीर्घाभावः" भा० । "त्मने तोकाय तनयाय मृड" ऋ० १।११४।६ । "उप त्मन्या वनस्पते" ऋ० १।१८८।१०। 'त्मन्या आत्मना" भा० । तृतीयास्थाने या । "अश्वो घृतेन त्मन्या" यजु० २९।१०। "वनस्पतिरवसृष्टो न पाशैः त्मन्या" २०।४५ ।

**त्यक्त** त्रि० त्यज—कर्मणि क्त । कृतत्यागे उत्सृष्टे समुज्झिते अमरः "अदृष्टार्थत्यक्तद्रव्यस्वीकारः प्रतिग्रहः" शूलपाणिः त्यजधातौ उदा०।२त्यक्तुमुद्यते च "मदर्थे त्यक्तजीविताः" गीता "इत्युक्तः करुणं वाक्यं वानरैस्त्यक्तजीवितैः, रामा० कि० ५४ अ० ।

**त्यज** हानौ दाने च भ्वा० सक० पर० अनिट् । त्यजति अत्याक्षीत् तत्याज । त्यक्तव्यं त्याज्यम् त्यागः त्यक्तं त्यक्ता त्यागी । "त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत् । ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत्" चाणक्यः "योऽत्याक्षीत् संयुगं भयात्" भा० द्रो० ९५ अ० "तं तत्याजाहितं पुत्रम्" रामा० २।३६अ० । "नैव नीलिवर्णेन कदाचित् त्यज्यते" पञ्चत०। (शूराः) "मदर्थे त्यक्तजीविताः" गीता "प्रतिरोद्धा गुरोश्चैव त्यक्ताग्निर्वार्द्धुषिस्तथा" मनुः "न माता न पिता न स्त्री न पुत्रस्त्यागमर्हति" मनुः "त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः । यज्ञदानतपः कर्म न त्याज्यमिति चापरे" गीता "ज्ञातिसम्बन्धिभिस्त्वेते त्यक्तव्याः कृतलक्षणाः" मनुः "चतुष्पदाः स्वयूथेभ्यस्त्यक्तव्याः परभूमिषु" वृ०सं०६०अ० । वेदे तु णि०। णलि तित्याज "यस्तित्याज सचि विदं सखायम्" ऋ०१०।७१।६। त्यागश्च स्वत्वध्वंसानुकूलव्यापारः न ममेदमित्याकारः। स च मूर्त्तद्रव्याणामेव भवति अमूर्त्तजीवनादेर्वियोजनरूपः । उपसर्गपूर्वकस्य तत्तदुपसर्गद्योत्यार्थयुक्तत्यागे इति भेदः ।

**त्यजस्** पु० त्यज—भावेऽसुन् । १त्यागे "इन्द्रस्य न त्यजसा विहृणाति" ऋ०१।१६६।१२।"त्यजसा त्यागेन" भा०कर्त्तरि—असुन् ।२त्यागकर्त्तरि त्रि०।"चिद्धारयातेमहि ! त्यजः" ऋ०